Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

# निघण्टौ प्रयुक्तानां जलवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्

# A Review of The Morphological Meanings of The Word 'Water' Read in Nighantu

**Munmun Misra, Dr. Laxminarayan Pandey**

Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**संक्षिप्तसारः** –

साक्षात्कृतधर्मैर्भारतीयमणीषाभिरध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः । ***वेदोऽखिलो धर्ममूलम्*** ।[1] मन्त्रब्राह्मणात्मकः[2] सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । ***इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः*** इति वेदभाष्यकार-सायणाचार्यराद्धान्तः ।[3] विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव । एतेषु शिक्षादिषु षड्वेदाङ्गेषु निरुक्तमेव वेदपुरुषस्य श्रोत्ररूपेण कल्पितम् । तदेव वेदस्य चतुर्थमङ्गम् आस्ते ।

भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । तेषु त्रिविधेषु काण्डेषु निघण्टु एव वैदिककोषग्रन्थः । तत्र गौरादिदेवपत्न्यन्तशब्दाः निवेशिता इति दृश्यते । तेषामेव शब्दानां निर्वचनमस्माभिः निरुक्तग्रन्थे समुपलभ्यन्ते । निघण्टौ विविधप्रकारेषु शब्देषु जलवाचकस्तु एक एव । तेषां जलवाचकशब्दानां रूपतत्त्वार्थसमीक्षणमेव गवेषणापत्रस्यास्य मूलविषयः एवेति ॥

**सूचीमुखशब्दाः : संक्षिप्तसारः, अवतरणिका, निघण्टु-शब्दस्यार्थः, निघण्टुस्थिताः जलवाचकशब्दाः, निघण्टौ प्रयुक्तानां जलवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**

[1] मनु. - 2.6

[2] मन्त्रब्राह्मणयोर्वेदनामधेयम् (आपस्तम्ब-यज्ञपरिभाषासूत्रम् – 2.6.3)

[3] ऐतरेयब्राह्मणे सायणाचार्यकृता भाष्यभूमिका

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**अवतरणिका** –

संस्कृतसाहित्ये तथा विश्वसाहित्ये वेदाः खलु केयूरायन्ते । विद्यन्ते धर्मादयः पुरुषार्था यस्मिन् ते वेदाः, इति बह्वृच्प्रातिशाख्यमतम् । सायणाचार्यस्त्वपौरुषेयं वाक्यं वेद इत्याह । यो ग्रन्थो वेदयति इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं स वेद इति ऋग्वेदभाष्यभूमिकायामुक्तम् । अपि वा प्रत्यक्षानुमानागोचरं ज्ञानमनेनैवावगम्यत इति कृत्वास्याखिलशास्त्रमूलत्वमभ्युपगम्यते । मन्त्रब्राह्मणारण्यकोपनिषद्भेदेनायं चतुर्विधः । संहितापि चतुर्विधा ऋग्यजुःसामाथर्वभेदेन । वेदानां गूढार्थत्वात्तद्बोधनाय वेदार्थकुशलैराचार्यैर्वेदार्थेभ्यो निकृष्य सुबोधानि शिक्षादीनि षड् वेदाङ्गानि प्रवर्तितानि विद्यास्थानत्वेन । प्रधानञ्चेदं वेदाङ्गम् । इतरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरित्रानाभिनिवेशात् । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गेष्वेतेषु निरुक्तं नाम ह्येकं वेदाङ्गम् । महर्षिपाणिनिना स्वशिक्षायां यथोक्तम् –

***छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥***
***शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥*** [4] इति ।

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधया तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते । भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । तेषु त्रिविधेषु काण्डेषु निघण्टुस्थितस्य जलवाचकशब्दानां रूपतत्त्वार्थसमीक्षणमेव गवेषणापत्रस्यास्य मुख्यविषयः ।

**निघण्टु-शब्दस्यार्थः** –

षड्वेदाङ्गेषु निरुक्तं नाम यत्र निर्वचनविधया तत्तदर्थबोधनाय पदजातं निरुच्यते निःशेषेणोपदिश्यते । भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । निघण्टुस्तु वैदिककोषाभिधानपरो ग्रन्थः । कोषशब्देन शब्दराशिस्तथा शब्दसमष्टिरवगम्यते । गवादेर्देवपत्न्यन्तरेकचत्वारिंशच्छतत्रयाधिकसहस्रशब्दराशिरिह निघण्टुग्रन्थे विधृतः । तेन हि बोध्यते निघण्टुस्तावद्विशालः कोषग्रन्थः । अत्र खलु वैदिकशब्दानां समाम्नायो दृश्यते । स च शब्दाराशिः ***सम्-सम्यक् आ-मर्यादया पारिपाट्या वा म्नायते आम्नायतेऽभ्यस्यत*** इति व्युत्पत्त्याभिधीयते समाम्नायशब्देन । अत एव तस्य गवादेः शब्दसमूहस्य ग्रन्थाकारेण पूर्वाचार्यैः पठिततया प्रसिद्धमभिधानं निघण्टुवाख्यया ।[5] एवञ्च मन्त्रार्थपरिज्ञानाय सोदाहरणं पञ्चाध्यायशास्त्रसंग्रहभावेन ऋषिभिरेकस्मिन्नाम्नाये शब्दराशेर्विधृतत्वात् सिद्धमिदं निघण्ट्वभिधानम् ।[6] प्रसङ्गेऽस्मिन् नाट्यशास्त्रे उक्तं तत्रभवता ग्रन्थकारेण –

[4] पा.शि. – 41-42

[5] तमिमं समाम्नायं निघण्टव इत्याचक्षते (नि. – 1.1.1.3)

[6] निघण्टवः कस्मात्, निगमा इमे भवन्ति (नि. – 1.1.1.4)

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

***नानानामाश्रयोत्पन्नं निघण्टुं निगमान्वितम् । धात्वर्थहेतुसंयुक्तं नानासिद्धान्तसाधितम् ।।***
***स्थापितोऽत्र भवेद्यत्र समासेनार्थसूचकः । धात्वर्थवचनेनेह निरुक्तं तत्प्रचक्षते ।।*** [7] इति ।

निघण्टुविधृतशब्दानामर्थपरितुबोधे सम्भवति मन्त्रार्थावगमः । वेदेभ्यः समाहृतानां तेषां हि शब्दानां समाम्नायेनार्थज्ञानप्रतिपत्तेर्मन्त्रार्थप्रतिबद्धत्वाद् अर्थज्ञानसम्पादनेन निगमादुपपन्नं निघण्टुत्वम् । निपूर्वाद् गमेरौणादिकेन तुन्प्रत्ययेन पृषोदरादित्वाद् गकारतकारयोर्घकारटकारत्वापत्तेः सिद्धं तदेव पदाभिधानम् । निश्चयेन (अर्थान्) गमयन्तीति (नि-गम् तुः=) निगन्तुः । उच्यते – ***निगमनान्निघण्टव उच्यत इत्य ौपमन्यवः*** [8] इति ।

पुनश्च, प्रकारान्तरेणापि[9] भवितुमर्हति निघण्टुशब्दस्य व्युत्पत्तिः । आहननं वचनं पाठः । *सूत्रे इदमाहतम्, ब्राह्मणे इदमाहतम्* इत्यादौ पाठार्थतया आङ्पूर्वाद्धन्तेः प्रयोगस्य दर्शनात्तस्मादेव धातोः पदस्योपपत्तेर्वर्णागमविपर्ययादिनियमप्रतिपत्त्या प्रसिद्धं निघण्टुत्वम्, तेषां शब्दानामेकत्र पाठात् । अपि वा समाहृताः[10] सन्तोऽपि एते शब्दाः निघण्टव उच्यन्ते सम् आ इत्येतयोरुपसर्गयोः स्थाने नि इत्युपसर्गाध्याहारेण हरतेर्हकारर्कारयोः घण्त्वापत्त्या उणादिकेन तुन्प्रत्ययेन वर्णाविकारात्तकारस्य टत्वेन नित्त्वात् टुवर्णाविशेषेण निघण्टुशब्दोपपत्तेः। यद्वा, निपूर्वाद् चुरादिगणे घटिधातोरपि शब्दोऽयं निष्पद्यते । तथा हि निर्वचनसमूहद्वारेण सम्भवति शब्दार्थप्रतिबोधः । प्रत्यक्ष-परोक्षातिपरोक्षवृत्तित्रयभेदेन शब्दस्य व्युत्पत्तेः सम्भवात् खल्वाकृतिवैचित्र्येण प्रतिपद्यते शब्दार्थज्ञानं गवादिशब्दार्थप्रतिबोधद्वारेण निगमान्निगन्तुत्वेन निघण्ट्वभिधानाधिगमात् । ग्रन्थस्यास्याध्यायपञ्चकत्वा-त् प्रत्यध्यायमपि तदाख्यया अभिव्यक्तेः तमिमं समाम्नायं निघण्टव इत्याचक्षते इत्येवं सङ्गतम् । नाम-आख्यात-निपात-उपसर्गैश्चतुर्भिः पदजातैर्ग्रन्थस्यास्य निघण्ट्वाख्यस्य स्वरूपं निर्णीतं निरुक्तकृद्यास्काचार्येण ।[11] तत्रास्मिन् ग्रन्थे बह्वर्थवाचका एकशब्दा एकार्थवाचकाश्च नैकविधाः शब्दा उपलभ्यन्ते । गवादिदेवपत्न्यन्तेषु शब्देषु तेषामुपग्रहो भवतीति दृश्यते ।

**निघण्टुस्थिताः जलवाचकशब्दाः** –

निघण्टुग्रन्थस्य प्रथमाध्यायस्य **द्वादशखण्डे** जलवाचकशब्दानां नामानि समुपलभ्यन्ते । तत्र जलवाचकाः एकोत्तरैकशतसंख्यकाः (101) शब्दाः सन्ति । त एव – **अर्णः, क्षोदः, क्षद्म, नभः, अम्भः, कबन्धम्, सलिलम्, वाः, वनम्, घृतम्, मधु, पुरीषम्, पिप्पलम्, क्षीरम्, विषम्, रेतः, कशः, जन्म, बृबूकम्, ब ुसम्, तुग्र्या, बुर्बुरम्, सुक्षेम, धरुणम्, सिरा, अररिन्दानि, ध्वस्मन्वत्, जामि, आयुधानि, क्षपः, अहिः, अक्षरम्, स्रोतः, तृप्तिः, रसः, उदकम्, प्रयः, सरः, भेषजम्, सहः, शवः, यहः, ओजः, सुखम्, क्षत्रम्, आवयाः, शुभम्, यादुः, भूतम्, भुवनम्, भविष्यत्, महत्, आपः, व्योम, यशः, महः, सर्णीकम्, स्वृतीकम्, सतीनम्, गहनम्, गभीरम्, गम्भरम्, ईम्, अन्नम्, हविः, सद्म, सदनम्, ऋतम्, योनिः, ऋतस्य योनिः, सत्यम्, नीरम्, रयिः, सत्, पूर्णम्, सर्वम्, अक्षितम्, बर्हिः, नाम, सर्पिः,**

[7] नाट्य. – 6.12-13
[8] नि. – 1.1.1.5
[9] अपि वाहननादेव स्युः, समाहता भवन्ति (नि. – 1.1.1.6)
[10] यद्वा समाहृताः भवन्ति (नि. – 1.1.1.7)
[11] तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति (नि. – 1.1.1.8)

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**अपः, पवित्रम्, अमृतम्, इन्दुः, हेम, स्वः, सर्गाः, शम्बरम्, अध्वम्, वपुः, अम्बुः, तोयम्, तूयम्, कृपीटम्, शुक्रम्, तेजः, स्वधा, वारि, जलम्, जलाषम्, इदम्** इति ॥

**निघण्टौ प्रयुक्तानां जलवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्** –

निघण्टुग्रन्थस्य प्रथमाध्यायस्य **द्वादशखण्डे एकोत्तरैकशतसंख्यकानां (101)** जलवाचकशब्दानां नामानि समुपलभ्यन्ते । तेषु प्रथमतः सप्ततिसंख्यक-जलवाचकानां शब्दानां व्युत्पत्तिः विमर्शश्च अत्र समुपस्थाप्यन्ते । तद्यथा -

1. **अर्णः** - निघण्टूक्तेषु जलवाचकेषु अर्णोऽस्ति[12] प्रथमः शब्दः । तस्य शब्दस्य निर्वचनमित्थं कर्तुं शक्यते –

**क)** निम्नप्रदेशगतिवाचकोऽयमकारान्तोऽर्णः शब्दोऽच्-प्रत्यययोगेन निष्पद्यते, ऋच्छति गच्छतीदमर्णः । उदकस्याधोगमनमस्माभिः सर्वैरेवाभ्युपेयते । अतएव निम्नप्रदेशगामित्वा[13]-दर्णशब्देनोदकं विहितम् । **ख)** धातुपाठे क्र्यादिगणे पठितस्य ऋ[14]-धातोरर्थोऽपि गत्यर्थकत्वम् । गमनार्थक-ऋ-धातुना सह अच्-प्रत्यययोगेनापि अर्णशब्दः निष्पद्यते ।

2. **क्षोदः**- उदकपर्य्यायेऽस्मिन् सम्प्रेषणार्थकशब्दस्तावत् क्षोदः । शब्दोऽयं जलवाचकेषु शब्देषु द्वितीयः शब्दः ।[15] प्रेषणार्थके क्षुदि धातौ[16] औणादिकासुनि[17] क्षोदशब्दः निष्पद्यते । क्षुद्यते इति क्षोदः । पर्वतादिभ्यःशिला-मृत्तिकादींश्चाधःपातनेन क्षुण्णत्वात् सम्प्रेषणत्वाज्जलस्य क्षोदत्वम् ।

3. **क्षद्म** – निघण्टूदकवाचकेषु क्षद्म[18] एव तृतीयः शब्दः । गत्यर्थक-हिंसार्थक[19]-प्रकाशकस्य क्षदधातोर्मनिनी[20]ति क्षद्मन् प्रातिपदिकमिदं निष्पन्नमिति देवयज्वनोऽभिप्रायः । गत्यर्थक-क्षद्मशब्देन जलस्य गतिधर्मिता सूचिता ।

4. **नभः** - जलपर्य्याये नभो[21]ऽस्ति चतुर्थतमपदम् । न न भातीति नभः ।[22] यदेव नित्य दीप्यति तदेव नभः । दीप्त्यर्थक-भा[23]तेरौणादिकासुनि बाहुलकाद् टि-लोपे, विभक्तिव्यत्ययेन च नभ इति पदं निष्पन्नम् । यदेव स्वदीप्त्या[24] नित्यभास्वरं तदेवोदकम् । उदकस्य शुक्लवर्णत्वात्तस्य नित्यभास्वरत्वं प्रकाशितम् ।

---

[12] निघ. – 1.12.1

[13] दे.य. – ऋच्छति निम्नं प्रदेशम् (निघ. -1.12.1)

[14] ऋ.गतौ – क्र्या.पर.धा.पा. - 1497

[15] निघ. – 1.12.2

[16] क्षुदिर् सम्प्रेषणे – रु.उ.धा.पा. - 1443

[17] सर्वधातुभ्योऽसुन् (उ.- 4.184) 628

[18] निघ. – 1.12.3

[19] 'क्षद गतिहिंसनयोः' इति सुबोधिनीकारः (निघ.- 1.12.45)

[20] अन्येभ्योऽपि दृश्यते (पा. – 3.2.75)

[21] निघ. – 1.12.4

[22] दे.य. – 1.12.4

[23] भा दीप्तौ – अ.पर.धा.पा.- 1051

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**5.** **अम्भः** – जलवाचकेषु अम्भ एव पञ्चमतमः ।[25] धातुपाठे स्वादिगणे व्याप्त्यर्थकधातो अम्भशब्दो -आप्[26]-निष्पद्यते । उदकवाचकादाप्लृधातोपसुन्, नुमागमो हस्वत्वं मकारश्चान्तादेशश्चेति ।[27] सर्वं परिव्याप्नोतीति अम्भः । जलमेव सर्वं व्याप्नोतीति जलस्याम्भत्वम् ।

**6.** **कबन्धम्** – निघण्टूक्तेषूदकवाचकशब्देषु कबन्धमेव[28] षष्ठस्थानीयम् । द्वाभ्यां धातुभ्यां पदमिदं निष्पन्नम् । कमेर्डप्रत्ययेन क-शब्दो निष्पन्नः, बन्ध्-धातुनाचि बन्ध इति निष्पन्नः । कमनीयबन्धनत्वाज्जलं सुखकरम् । बन्धनमचञ्चलं स्थिरं वा । जलमध्ये स्वाभाविकगतिर्न सम्भवति । अतएवोदकमेव बन्धनकारणम् ।

**7.** **सलिलम्-** निघण्टुपठितजलवाचकेषु सलिलमे[29]व सप्तमस्थानीयम् । गत्यर्थकात् षल्[30]-धातोरौणादिक-इलच्[31]-प्रत्ययेन सलिलशब्दस्य व्युत्पत्तिरिति । निम्नप्रदेशमेति गच्छति सलतीति सलिलम् ।[32] अपि च गम्यते प्राणिभिरिति[33] सलिलम् ।

**8.** **वाः** - निघण्टुस्थितेषूदकवाचकेष्वष्टमशब्द एव वाः ।[34] धातुपाठे स्वादिदणे वरणार्थके उभयपदी-वृञ्-धातौ[35] क्विप्-प्रत्यये कृत् सति प्रातिपदिकं वा-इति निष्पन्नम् । अनन्तरं प्रथमैकवचने सु-विभक्तौ,[36] उ-कारलोपे,[37] स-स्थाने रुत्वादेशे,[38] रु-स्थाने विसर्जनाये[39] वा-शब्दोऽयं निर्वाह्यते । इन्द्रेण वृतत्वाज्जलस्य वरणीत्वम् ।

**9.** **वनम्** - जलवाचकेषूल्लिखितेषु निघण्टुस्थितेषु नवतमपदमस्ति वनम् ।[40] धातुपाठे भ्वादिगणे सम्भोजनार्थकस्य वन[41]-धातोर्घ[42]प्रत्ययेन वनपदं निष्पन्नम् । घ-प्रत्ययः कर्मणि विहितत्वाज्जलमेव कर्मपदम् । प्राणिनः प्राणधारणादिरूपविविधकर्मसम्पादनार्थं जलं सततं सेवन्ते इति जलस्य वनत्वम् ।[43]

---

[24] दे.य. – भात्येव स्वया दीप्त्या... (निघ.- 1.12.4)
[25] निघ.- 1.12.5
[26] आप्लृ व्याप्तौ - स्वा.पर.धा.पा. - 1260
[27] उदके नुम्भो (उ. – 4.209) 649
[28] निघ.- 1.12.6
[29] निघ. – 1.12.7
[30] षल गतौ – भ्वा.पर.धा.पा. - 547
[31] सलिकल्यनिमहिभडिभण्डि... (उ. – 1.54) 54
[32] दे.य. – सलति गच्छति निम्नं देशं (निघ. – 1.12.7)
[33] दे.य. – निघ. – 1.12.7
[34] निघ. – 1.12.8
[35] वृञ् वरणे स्वा.उ.धा.पा. - 1258
[36] स्वौजसमौट्छष्टा... (पा. – 4.1.2)
[37] उपदेशेऽजनुनासिक इत् (पा. – 1.3.2)
[38] ससजुषो रुः (पा. – 8.2.66)
[39] खरवसानयोर्विसर्जनीयः (पा. – 8.3.15)
[40] निघ. – 1.12.9
[41] वन-षण-सम्भक्तौ – भ्वा.पर.धा.पा. – 463-464

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**10. घृतम् -** जलपर्य्यायेषु घृतम[44]स्ति दशमतमपदम्। धातुपाठे जुहोत्यादिगणे दीप्त्यर्थक-धातोः कर्तृवाच्ये क्त[46]-घृ[45]-प्रत्ययेन पदमिदं निष्पद्यते। यदेव स्वदीप्त्या दीप्तते तदेव घृतम्।[47] जलस्य शुक्लवर्णत्वाज्जलं भास्वते दीप्यते इति यावत्।

**11. मधु -** उदकवाचकेष्वेकादशतमः शब्दस्तावत् मधु।[48] मेघोदरवर्त्ति सलिलं[49] मधुशब्देनोच्यते। गमनार्थकात्धम[50]-धातोरौणादिक-उ-प्रत्ययेन वर्णव्यापत्तिद्वारेण च शब्द ोऽयं निश्पद्यते। मेघोदरविनिर्मुक्तत्वात्तस्योदकस्य मधुत्वमिति।[51]

**12. पुरीषम् -** पर्य्यायेऽस्मिन् द्वादशपदमेव पुरीषम्।[52] धातुपाठे जुहोत्यादिगणे पालन-पुरणार्थकात् पृ[53]-धातोरौणादिक-ईषन्[54]-प्रत्ययेन पुरीषमिति पदं निष्पन्नम्। प्रलयकाले सर्वमेव जगत् अथवा तडागादिजलाशयाः पूर्य्यन्ते[55]। अतएव पुरीषम् नाम जलमिति।

**13. पिप्पलम् -** जलपर्यायेषु निघण्टूक्तेषु पिप्पलमे[56]व त्रयोदशतमः शब्दः। गत्यर्थकात् प्लुङ्[57] – धातोः पिप्पलमिति पदं निष्पन्नम्। प्लवतेऽपि गच्छत्यपि। यदेव गच्छति तिष्ठति च तदेव जलम्।

**14. क्षीरम् –** पर्य्यायेऽस्मिन् क्षीरमस्ति चतुर्दशतमपदम्।[58] भ्वादिगणे सञ्चालनार्थकेन क्षर-धातुना[59] सह बाहुलकाद्धीरन्-प्रत्ययेन, टि-लोपेन[60] च क्षीरमिति पदं निष्पन्नम्। यदेव मेघात् क्षरति तदेव क्षीरं जलं वा।[61] दाशतय्यां जलवाचकक्षीरशब्दस्य प्रयोगो दृश्यते।

---

[42] पुंसि संज्ञायां षः प्रायेण (पा. – 3.3.118)
[43] दे.य. – वन्यते सेव्यते वनम् (निघ. – 1.12.9)
[44] निघ.- 1.12.10
[45] घृ क्षरणदीप्त्योः- जु.पर.धा.पा. - 1096
[46] अञ्जिघृसिभ्यः क्तः (उ.-3.89) 369
[47] दे.य. – दीप्यते वा स्वया दीप्त्या (निघ.- 1.12.10)
[48] निघ. – 1.12.11
[49] दे.य. – मेघोदरवर्त्तिसलिलं मध्वित्युच्यते (निघ. - 1.12.11)
[50] दे.य. – धमतिर्गतिकर्मा (निघ. - 1.12.11)
[51] दे.य. – निर्धाम्यते निःकल्यते हि तन्मेघात् (निघ. - 1.12.11)
[52] निघ.- 1.12.12
[53] पृ पालनपूरणयोः- जु.पर.धा.पा.-1086
[54] श्रृपृभ्यां किच्च (उ.- 4.27) 467
[55] दे.य.- पूर्य्यतेऽनेन तडाकादि (निघ.- 1.12.12)
[56] निघ. – 1.12.13
[57] प्लुङ्गतौ – भ्वा.आ.धा.पा. - 958
[58] निघ. – 1.12.14
[59] क्षर सञ्चालने – भ्वा.पर.धा.पा. - 851
[60] अचोऽन्त्यादि टि (पा. – 1.1.63)
[61] दे.य. – क्षरति हि तत् मेघात् (निघ. – 1.12.14)

**15.** **विषम्** - निघण्टुस्थितेषु जलपर्य्यायेषु विषम[62]स्ति पञ्चदशतमं पदम। धातुपाठे जुहोत्यादिगणे व्याप्त्यर्थक-विष्[63]-धातुना सह कन्[64]-प्रत्यययोगेन विषमिति पदं निष्पन्नम्। सर्वं व्याप्नोतीति विषम्।

**16.** **रेतः** - जलवाचकेषु रेतः अस्ति षोडशपदम्।[65] दिवादिगणे स्रवणार्थकात् रीङ्[66]-धातोरौणादकि-असून्-प्रत्ययेन, तुगागमेन, गुणेन च पदमिदं निष्पद्यते। यदेव क्षरितं तदेव रेतस्पदवाच्यम्।[67] जलस्य क्षरितत्वाज्जलमपि रेतशब्देनाभिधीयते।

**17.** **कशः** - कश[68] एवोदकवाचकशब्देषु निघण्टुस्थितेषु सप्तदशतमः शब्दः। धातुपाठे भ्वादिगणे पठितस्य कश-धातोरर्थ एव गत्यर्थकत्वम्। गत्यर्थक-कश[69]-धातोरौणादिकासून्[70]-प्रत्यययोगेन कशशब्दः निष्पन्नः। निम्नप्रदेशं सततं कशति गच्छतीति कशः।[71]

**18.** **जन्म** - जलपर्य्यायेष्वष्टादशतमपदमस्ति जन्म।[72] धातुपाठे दिवादिगणे प्रादुर्भावार्थकात् जन्[73]-धातो औणादिक-मनिन्-प्रत्ययेन[74] शब्दोऽयं निष्पद्यते। सृष्टिकाले स्वकारणात् प्रादुर्भूतत्वाज्जन्मपदेन जलमुच्यते।[75] अग्निरेव जलकारणम्।

**19.** **बृबूकम्** - बृबूकम् उदकपर्य्याये उनविंशतितमपदम्।[76] अदादिगणे शब्दार्थकेन ब्रू[77]-धातुना सह औणादिक-ऊक-प्रत्ययेन[78] बृबूकमिति पदं निपातितम्। यदेव मेघात् पतच्छब्दं करोति; द्युलोकात्, मेघाच्च भ्रश्यति। एतदर्थं तस्योदकस्य बृबूकत्वम्।

**20.** **बुसम्** - उदकपर्य्यायेषु बुसमस्ति विंशतितमपदम्।[79] दिवादिगणे बुस्धातोः[80]- बाहुलकात् क[81]प्रत्ययेन बुसमिति - पदं निष्पन्नम्। उत्सर्गार्थेवर्षणार्थे वा बुसं प्रयुज्यते। मेघाद्वर्षितत्वाज्जलस्य बुसत्वमिति।[82]

---

[62] निघ. - 1.12.15
[63] विष्लृ व्याप्तौ - जु.उभ.धा.पा. - 1095
[64] विषेर्व्याप्तिकर्मणिकन् (द.उ.वृ.-9.20)
[65] निघ. – 1.12.16
[66] रीङ् श्रवणे – दि.आ.धा.पा. - 1138
[67] दे.य. – रीयते स्रवति रेतः (निघ. – 1.12.16)
[68] निघ. – 1.12.17
[69] कस गतौ – भ्वा.पर.धा.पा. -860
[70] सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
[71] दे.य. – कशति गच्छति निम्नं प्रदेशम् (निघ.- 1.12.13)
[72] निघ. – 1.12.18
[73] जनी प्रादुर्भावे – दि.आ.धा.पा. - 1149
[74] सर्वधातुभ्यो मनिन् (उ. – 4.144) 584
[75] दे.य. – जायते सृष्टिकाले स्वकारणात् (निघ. – 1.12.18)
[76] निघ. – 1.12.19
[77] ब्रूङ् वक्तायां वाचि – अ.उ.धा.पा. - 1044
[78] उलूकादयश्च (उ. – 4.41) 481
[79] निघ. – 1.12.20

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

**21. तुग्र्या** – जलपर्य्यायेषु निघण्टूक्तेष्वेकविंशशतितमा तावत् तुग्र्या ।[83] धातुपाठे भ्वादिगणे पठितः हिंसार्थक-धातुः क्विप्[85]-तुज्[84]प्रत्ययेन निष्पद्यते । तुज्-इत्यस्य अर्थो रश्मिः ।[86] रश्मिरालोकेन तमः हिनस्ति, औष्ण्येन जनान् हिंसति च ।

**22. बुर्बुरम्** - निघण्टूक्तेषूदकवाचकेषु द्वाविंशतमपदमस्ति बुर्बुरम् ।[87] धातुपाठे जुहोत्यादिगणे पालन-पूरणार्थकात् पॄ[88]-धातोर्बाहुलकात् क[89]-प्रत्ययेन, उ-कारेण[90] पुरमिति पदं निष्पद्यते । यदेव शरीरस्य पूरकं पालकं वा तदेव पुरम् ।[91] पदमिदं पृषोदराद्य[92]न्तर्गतात् उ-कारस्य द्विर्भावेन, प-कारस्थाने ब-कारेण, विसर्गस्थाने रेफादेशेन, अस्त्यर्थे मतुप्[93] प्रत्ययेन च बुर्बुरमिति पदं निष्पन्नम् । पालन-पूरणार्थरूपकार्यद्वयं जले विद्यमानत्वाज्जलस्य बुर्बुरत्वमिति ।

**23. सुक्षेम-** उदकपर्यायेषु सुक्षेमा[94]स्ति त्रयोविंशतितमः शब्दः । सूपपदात्-तुदादिगणीय-गत्यर्थक-क्षि[95]-धातोरौणादिक-मन्[96]प्रत्यययोगेन सूक्षेमशब्दः निष्पन्नो जातः । जलस्थानं दृष्टा प्राणिनः तं निवासार्थं प्रति गच्छन्ती[97]ति सुक्षेम ।

**24. धरुणम्** – निघण्टुस्थितेषूदकपर्य्यायेषु चतुर्विंशतितमपदमस्ति धरुणम् ।[98] धातुपाठो भ्वादिगणे धारणार्थकात् णिजन्त-धृञ्[99]-धातोर्णिच्-प्रत्ययेन,[100] धारेर्निलोपेन, क्युन्-प्रत्ययेन च धरुणमिति पदं निष्पादितम् । जगद्धारणाय शक्यत्वाज्जलं धरुणपदेनोच्यते ।[101] ऋग्वेदे शब्दस्यास्ये जलवाचकरूपेण बहुलप्रयोगो दृश्यते ।

---

80 बुस उत्सर्गे – दि.पर.धा.पा. - 1219
81 गेहे कः (पा. – 3.1.144)
82 दे.य. – बुस्यते उत्सृज्यते मेघैरिति बुसम् (निघ. – 1.12.20)
83 निघ.- 1.12.21
84 तुजतिर्हिंसायाम् – भा.पर.धा.पा.-244
85 क्विप् च (पा.- 3.2.76)
86 तुजो रश्मयः (निघ.- 1.12.21)
87 निघ.- 1.12.13
88 पॄ पालनपूरणयोः-जु.पर.धा.पा.- 1086
89 गेहे कः (पा.- 3.1.144)
90 उदोष्ठ्यपूर्वस्य (पा.- 7.1.102)
91 दे.य.- वपुषः शरीरस्य पूरकं पालकं वा वपुः पुरं सत् (निघ.- 1.12.22)
92 पृषोदरादीनि यथोपदिष्टम् (पा.- 6.3.108)
93 अर्श आदिभ्योऽच् (पा.- 5.2.127)
94 निघ. – 1.12.2
95 क्षि निवासगत्ययोः – तु.पर.धा.पा. - 1403
96 अर्त्तिस्तु सुहुसृधृक्षिक्षभाया... (उ.- 1.137) 137
97 दे.य. – गच्छन्त्यनेन पन्थानमिति सवा (निघ. – 1.12.23)
98 निघ. – 1.12.24
99 धृञ् धारणे – भ्वा.उ.धा.पा. - 900

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**25. सिरा-** निघण्टुपठितेषु जलपर्य्यायेषु पञ्चविंशतितमः शब्दस्तावत् सिरा ।[102] धातुपाठे भ्वादिगणे गत्यर्थक-सृ[103]-धातोरच्-प्रत्ययेन,[104] टाप्प्रत्ययेन, अकारस्येकारो व्यत्ययेन[105] च सिराशब्दः निष्पन्नः। सरति गच्छतीति सिरा।

**26. अररिन्दानि-** जलपर्य्यायेषु षट्विंशतितमपदमस्ति अररिन्दानि ।[106] धातुपाठेऽदादिगणे दानार्थकात् राधातोः[107] कि-प्रत्ययेन[108] ररिरिति शब्दः निष्पन्नः । ररिर्दाता ।[109] यस्य ररिर्दाता न विद्यते तदेवाररि, अन्यैरप्रदत्तमित्यर्थः ।[110] एतदेवाप्रदत्तं द्रव्यं येन प्रदीयते तदेवाररिदम् । अररिपदे क-प्रत्ययेन[111] अररिदमितिपदं निष्पन्नम् । द-कारपूर्वे न-कारागमेनाररिन्दमिति पदं सिद्धम्। सुखादिकं दातुं शक्यत्वाज्जलमररिन्दानीति पदेनोच्यते।

**27. ध्वस्मन्वत्-** जलवाचकेषु ध्वस्मन्वद[112]स्ति सप्तविंशतितमः शब्दः । भ्वादिगणे गत्यर्थकात् ध्वंसु[113]-ध ातोरौणादिक-मनिन ्-प्रत्यययोगेन,[114] बाहुलकादुलोपे च निष्पन्नेन ध्वस्मशब्देन सह मतुप्योगेन नुडागमेन,[115] तस्य वत्वेन च ध्वस्मन्वच्छब्दः निष्पद्यते । शब्दस्यास्य गतिवाचकत्वे मतद्वयमुपलभ्यतेऽस्माभिः । क) स्वकीयोत्सपथात् अधःपतनं निम्नप्रदेशगमनं वा ।[116] ख) जलमुद्दिश्यजलार्थिनां बहुदूरगमनम् [117] इति च।

**28. जामि** - पर्य्यायेऽस्मिन् जाम ि एव अष्टाविंशतितमः[118] । गत्यर्थकेन जम[119]-धातुना सह बाहुलकादौणादिक-इञ ्-प्रत्ययेन[120] जामिशब्दोऽयं निष्पद्यते। निम्नप्रदेशगतिवाचकोऽयं जामिशब्दः ।[121] जलस्य निम्नगामित्वं प्रसिद्धम्।

---

[100] हेतुमति च (पा. – 3.1.26)
[101] दे.य. – धारयति जगत् धरुणम् (निघ. – 1.12.24)
[102] निघ. – 1.12.25
[103] सृ गतौ – भ्वा.पर.धा.पा. - 935
[104] अजाद्यतष्टाप् (पा. – 4.1.4)
[105] व्यत्ययो बहुलम् (पा. – 3.1.85)
[106] निघ. – 1.12.26
[107] रा दाने – अ.पर.धा.पा. - 1057
[108] आदृगमहनजनः किकिनौ लिट् च (पा. – 3.2.171)
[109] निघ. – 1.12.26
[110] दे.य. – ररिर्यस्य न विद्यते तदररि, अन्यैरदत्तम्त्यर्थः (निघ. – 1.12.26)
[111] आतोऽनुपसर्गे कः (पा. – 3.2.3)
[112] निघ. – 1.12.27
[113] ध्वंसु गतौ च – भ्वा.आ.धा.पा. - 755
[114] सर्वधातुभ्यो मनिन् (उ.- 4.144) 584
[115] अनो नुट् (पा. – 8.2.16)
[116] दे.य. – ध्मस्म ध्वंसन ं मेघेभ्यः पर्वतादिभ्यो वा अधःपतनं निम्नप्रदेशगमनम् (निघ. – 1.12.27)
[117] दे.य. – जलार्थिकर्त्तृकं वा गमनमस्यास्ति (निघ. - 1.12.27)
[118] निघ. - 1.12.28
[119] जामेर्गतिकर्मणः (निघ. - 1.12.28); जमति – (निघ. – 2.14.104)
[120] वसिवपियजिराजिव्रजि... (उ. – 4.124) 564
[121] दे.य. – जमति गच्छति निम्नं प्रदेशम् (निघ. - 1.12.28)

I J A M S R

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**29. आयुधानि** – जलवाचकेषु एकोनत्रिंशत्तमशब्दोऽस्ति आयुधानि ।[122] धातुपाठे दिवादिगणे आ-पूर्वकात् सम्प्रहारर्थक युध्[123]-धातोर्घञ्-प्रत्यये करणवाच्ये क-प्रत्ययेन च युधमिति पदं निष्पन्नम् । येन प्रहरति सम्प्रहरति तदेवायुधमिति ।[124] जलेन सम्यग्रूपेण शत्रुं प्रहरतीति तस्यायुधत्वम् । साम्प्रतं जलकामान-यन्त्रेण विक्षोभकारिणो विक्षिप्यन्ते ।

**30. क्षपः** – पर्य्यायेऽस्मिन् त्रिंशत्तमपदमस्ति क्षपः ।[125] धातुपाठे चुरादिगणे प्रेरणार्थकात् क्षप[126]-धातोरसुन्-प्रत्ययेन, णि-लोपेन च क्षपशब्दोऽयं निष्पन्नम् । पिपासां क्षिपयति नाशयतीति जलस्य क्षपत्वमिति ।[127]

**31. अहिः** – निघण्टूक्तेषूदकवाचकेषु अहि[128] एव एकत्रिंशत्तमः शब्दः । धातुपाठेऽदादिगणीये निम्नप्रदेशगतिवाचकोऽयमहिः इ[129]-धातोरौणादिकेन्[130]-प्रत्यययोगेन निष्पद्यते । जलस्य निम्नप्रदेशगमनं प्रसिद्धमिति कृत्वा अहिः – इति शब्देन जलमुच्यते ।

**32. अक्षरम्** – अक्षरमेव[131] निघण्टूक्तेषूदकवाचकेषु द्वात्रिंशत्तमपदम् । रुधाधिगणेऽञ्ज[132]-धातोर्बाहुलकात् सरन्[133]-कारलोपेन चाक्षारमिदं पदं निष्पन्नम्-न ,प्रत्ययेन । जलेन वर्षणेन च भूमिं सिञ्चयति इत्यक्षरम् । जलमपि भूमिं सेचयतीति तस्य जलस्याक्षरत्वम् ।[134]

**33. स्रोतः-** जलपर्य्यायेषु स्रोतो[135]ऽस्ति त्रयस्त्रिंशस्तमः शब्दः । जलस्य निम्नगामित्वमस्माकं सर्वैरेवाभ्युपेयते । भ्वागिगणे गत्यर्थकात् स्रु[136]-धातुना सह असुन्[137]-प्रत्ययेन स्रोतः शब्दोऽयं निष्पन्नः । निम्नप्रदेशं स्रवति गच्छतीति स्रोतः ।

**34. तृप्तिः** – निघण्टुस्थितेषु जलवाचकेषु चतुस्त्रिंशतत्तमः शब्दस्तावत् तृप्तिः ।[138] दिवादिगणे तृप्त्यर्थक-तृप्[139]-धातोः क्तिन्-प्रत्ययेन तृप्तिशब्दः निष्पन्नः । येन देवाः तर्पिताः, तृप्यन्ति च सैव तृप्तिः जलं वा ।[140]

---

[122] निघ. -1.12.29
[123] युध सम्प्रहारे – दि.आ.धा.पा. - 1173
[124] आयुध्यत्यनेनेत्यायुधम् (निघ. – 1.12.29)
[125] निघ. – 1.12.30
[126] क्षप प्रेरणे – चु.पर.धा.पा. - 1941
[127] दे.य. – क्षिपयति प्रेरयति नाशयता पिपासाम् (निघ. – 1.12.30)
[128] निघ. - 1.12.31
[129] इण् गतौ – अ.आ.धा.पा. - 1045
[130] सर्वधातुभ्य इन् (उ.-4.117) 557
[131] निघ. – 1.12.32
[132] अञ्जु व्यक्तिमर्षणकान्तिगतिषु – रु.पर.धा.पा. - 1458
[133] अशेः सरः (ऊ. – 3.70) 350
[134] दे.य. - ... संचयति वर्षेण भूमिम् (निघ. – 1.12.32)
[135] निघ. - 1.12.33
[136] स्रु गतौ – भ्वा.पर.धा.पा. - 940
[137] स्रुरीभ्यां नुट् च (उ. – 4.201) 641
[138] निघ. – 1.12.34

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**35. रसः** – निघण्टुस्थितेषु जलपर्य्यायेषु रस[141] एव पञ्चत्रिंशतत्तमः शब्दः । धातुपाठे भ्वादिगणस्थितेन रस[142]धातुना सह अच्-प्रत्ययेन रसशब्दो निष्पन्नः । मेघपर्वतादिभ्यः पतज्जलं रसति गच्छतीति रसः ।[143]

**36. उदकम्** – जलवाचकेषु षट्त्रिंशत्तमपदं तावदुदकम् ।[144] धातुपाठे भ्वादिगणे उत्पूर्वकात् खनो[145] रौणादिक-क्वन्[146]-प्रत्ययेन धातुलोपेन उदकं पदमिदं निष्पाद्यते । स्ववेगं भूमिमुत्खनतीत्युदकम् । जलमपि स्वकीयवेगे प्रवाहकाले भूमिमुत्खनति, वेगेन प्रवहति ।[147] अतएव तस्य जलस्योदकत्वम् ।

**37. प्रयः-** जलपर्य्यायेषु सप्तत्रिंशत्तमः शब्दस्तावत् प्रयः ।[148] धातुपाठे भ्वादिगणे प्र-पूर्वक-यम[149] धातोरौणादिकासुनि प्रत्यये कृते टिलोपे च कृते सति प्रयशब्दोऽयं निष्पद्यते । प्रकर्षेण प्रयन्ति गच्छन्ती[150]ति प्रयः ।

**38. सरः-** उदकपर्य्यायेषु निघण्टुस्थितेषु सर[151] एवाष्टत्रिंशत्तमशब्दः । शब्दोऽयं भ्वादिगणान्तर्गतेन सृ[152]धातोरौणादिकासून्[153]-प्रत्ययेन निष्पन्नो जातः । सरति स्रियते गच्छतीति वा सरः ।[154]

**39. भेषजम्** – जलवाचकेष्वेकोनचत्वारिंशत्तमपदमस्ति भेषजम् ।[155] चिकित्सार्थकेन भिषज्-धातुना सह घ[156]-प्रत्ययेन भेषजमिति पदं निष्पन्नम् । यदेव रोगमुक्तेरुपायस्वरूपं तदेव भेषजम् । चिकित्साशास्त्रे जलस्य रोगनाशकत्वाज्जलं भेषजपदवाच्यम् ।

---

139 तृप प्रीणने – दि.पर.धा.पा. - 1195
140 निघ. – तृप्तन्ति हि देवतास्तेन तर्पिताः (निघ. – 1.12.34)
141 निघ. - 1.12.35
142 रस शब्दे – भ्वा.पर.धा.पा. - 713
143 दे.य. – रसति हि तन्मेघपर्वतादिभ्यः पतत् (निघ. - 1.12.35)
144 निघ. – 1.12.36
145 खनु अवदारणे – भ्वा.पर.धा.पा. - 878
146 उदकश्च (उ. – 2.40) 197
147 दे.य. – उत्खनति वा भूमिं स्वेन वेगेन कर्ता (निघ. – 1.12.36)
148 निघ. - 1.12.37
149 यम उपरमे – भ्वा.पर.धा.पा. - 984
150 निघ. - 1.12.37
151 निघ. - 1.12.38
152 सृ गतौ – भ्वा.पर.धा.पा. - 935
153 सर्वधातुभ्योऽसुन् (उ. – 188) 628
154 दे.य. – सरति स्रियते वा सरः (निघ. - 1.12.38)
155 निघ. – 1.12.39
156 पुंसि संज्ञायां घः प्रायेण (पा. – 3.3.118)

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**40. सहः** – जलवाचकेषु सह स्तावच्चत्वारिंत्तमपदम् । धातुपाठे दिवादिगणेऽभिभवार्थकात् पराजयार्थकाद्वा सह-प्रत्ययेन सहमिति पदं-धातोरसुन्निष्पन्म् । सहस् बलवाचकम् । अस्तित्वार्थकपदमिदं -मत्वर्थीयप्रत्ययलोपेन सहस्-पदवाच्यम् ।-बलवाचकं भवति। बलयुक्तत्वाज्जलमपि सहस्

**41. शवः-** निघण्टूल्लिखितेषु जलपर्यायेषु एकचत्वारिंशत्तमशब्दस्तु शवः ।[157] भ्वादिगणे गत्यर्थक-वृद्ध्यर्थकाभ्यां श्वे[158]रौणादिकासुनि, सम्प्रसारणे[159] च शब्दोऽयं निष्पद्यते। जलस्य गमनमस्माभि सवैरेवाभ्युपेयते। न केवलं तद्गच्छति, परन्तु वर्षासु वर्द्धते च। अत एव गमनत्वाद् वर्द्धमानत्वाच्च तस्य जलस्य शवस्त्वमिति।[160]

**42. यहः-** पर्य्यायेऽस्मिन् द्विचत्वारिंशततमशब्दो यहः[161] । [162]यातेर्ह्वयतेश्चासुनीति यहशब्दो निष्पद्यते। या[163]-धातुः प्राप्त्यर्थकः, ह्वे[164] - धातुश्चाह्वानार्थकः। पिपासितैः प्राणिभिरिदं जलं प्राप्तत्वात्, यज्ञे देवतारूपेण आहूयमाणत्वाच्चोदकस्य यहस्त्वमिति।[165]

**43. ओजः** - निघण्टूक्तेषूदकवाचकेषु ओजो[166]ऽस्ति त्रिश्चत्वारिंशत्तमः शब्दः। तुदादिगणे वृद्ध्यर्थकात् उब्ज्[167] - धातोरौणादिकासुनी[168]ति ओजशब्दोः निष्पन्नः । वर्षासु जलम् अधिकतया वर्द्धतेबलवान् भवति[169] , इति तस्य जलस्योजत्वम्।

**44. सुखम्** – जलपर्य्याये चतुश्चत्वारिंशत्तमपदमस्ति सुखम्।[170] जलस्यापि सुखावहत्वात् सुख-शब्देन जलमित्युच्यते। सुखमपि प्रीतिं विदधाति मानवानाम्। सुखन्तु जगतामेव काम्यम्। सुखमस्ति कार्यं जलन्तावत्कारणमित्याचक्षते।

**45. क्षत्रम्** - निघण्टूक्तेषूदकवाचकेषु पञ्चचत्वारिंशत् शब्दस्तावत् क्षत्रम्।[171] गत्यर्थक-क्षद[172]-धातुना सहौणादिक-त्र[173]-प्रत्यययोगेन द-कारलोपेन च क्षत्रमिति पदं जातम् । शब्दस्यास्य द्विविधार्थोऽस्माभिः प्राप्तः । क)

---

[157] निघ. – 1.12.41
[158] डु ओ श्वि गतिवृद्ध्योः – भ्वा.पर.धा.पा. - 1010
[159] श्वेः सम्प्रसारणं च (उ.- 4.192) 632
[160] दे.य. – श्वयति गच्छति वर्द्धते वा वर्षाकाले (निघ. - 1.12.41)
[161] निघ.- 1.12.42
[162] पृषोदरादीनि यथोपदिष्चम् (पा.- 6.3.108)
[163] या प्रापणे – अ.पर.धा.पर.- 1089
[164] ह्वेञ् स्पर्धायां शब्दे च – भ्वा.उ.धा.पा.- 1008
[165] दे.य. – यातं प्राप्तं पिपासितैः, हुतं च यज्ञे देवतात्वात् (निघ.- 1.12.42)
[166] निघ.-1.12.43
[167] उब्ज आर्जवे – तु.पर.धा.पा. - 1303
[168] उब्जेर्बले बलोपश्च (उ.- 4.191) 631
[169] दे.य.- बर्द्धते वा वर्षासु बलवद्वा (निघ.-1.12.43)
[170] निघ. – 1.12.44
[171] निघ. - 1.12.45

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

निम्नप्रदेशगतिवाचकेदं क्षत्रपदम् ।[174] अपरञ्च, ख) जलमुद्दिश्य जलार्थिनां गमनम् ।[175] निम्नप्रदेशगमनत्वाज्जलार्थिभिः तदुद्देश्य गमनत्वाच्च जलस्य क्षत्रत्वमिति ।

**46.** **आवयाः-** आङ्-पूर्वाददादिगणे पठितस्य वी[176]-धातोः बाहुलकादौणादिकासि-प्रत्ययेन निष्पादितेन आवयेति-शब्देनाभिमुख्येन[177] जलस्य गमनं सूचितम् । पर्य्यायेऽस्मिन् आवया[178] षट्चत्वारिंशत्तमः शब्दः ।

**47.** **शुभम्** - उदकवाचकेषु सप्तचत्वारिंशत्तमं पदं शुभमि[179]ति । भ्वादिगणे दीप्तिबोधकात् शुभ् –धातोः क्विप्-प्रत्ययोगेन विभक्तिव्यत्ययेन शुभमिति पदं निष्पन्नम् । स्वकीयेन तेजसा दीप्तते इति शुभम् । अधिदैवदृष्टत्वाज्जलं दीप्तियुक्तम् ।

**48.** **यादुः-** निघण्टावुदकपर्यायेषु यादुः[180] अष्टचत्वारिंशत्तमः शब्दः । अदादिगणे प्राप्त्यर्थकाद् गत्यर्थकाद्वा या[181]-धातोर्बाहुलकादौणादिक-उ[182]-प्रत्ययेन दुडागमेन च यादुशब्दोऽयं निष्पन्नः । निम्नं प्रदेशं याति[183] गच्छतीति यादुः ।

**49.** **भूतम्-** उदकपर्य्यायेषूनपञ्चाशतत्तमपदमिदं भूतम् । धातुपाठे भ्वादिगणे सत्तार्थकभू[184]- धातोः कर्तृवाच्येऽतीतकाले क्तप्रत्यययोगेन भूतमिति पदं निष्पादितम् । पूर्वं यदेव सत्तदेव भूतपदवाच्यम् । आसृष्टेरा चोत्पेत्तेः -परमब्रह्मकैवासीत्। -। तस्मादेव जगदुत्पत्तिः श्रीमद्भगवद्गीतायामुपनिषदि च वर्णिता । गीतायामुक्म् ***अहं कृत्स्नस्य जगतः प्रभवः*** , [185]***...मयि सर्वमिदं प्रोतं*** [186]***...***इत्यादयः । अतएव जलमपि तस्मात्परब्रह्मणरुत्पन्नम् । अतएव भूतमिति पदेन जलमुच्यते ।

**50.** **भुवनम्-** निघण्टुक्तेषूदकवाचकेषु भुवनम्[187] एव पञ्चाशत्तमपदम् । सत्तार्थक-भू[188]-धातोरौणादिक-क्युन्[189]-प्रत्ययेन, उवङादेशेन च शब्दोऽयं निष्पद्यते । सर्वेषां पदार्थानामस्तित्व-परकत्वाज्जलस्य भुवनत्वम्[190] ।

[172] 'क्षद – गतिहिंसनयोः' इति सुबोधिनीकारः

[173] गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः (उ. – 4.166) 606

[174] दे.य. -...गच्छति निम्नं ... (निघ. - 1.12.45)

[175] दे.य.- ...गम्यते वा तदर्थिभिः (निघ.- 1.12.45)

[176] वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु – अ.पर.धा.पा. - 1048

[177] दे.य. – अस्यते वीयते आभिमुख्येन गम्यते इति वा आवयाः (निघ. - 1.12.45)

[178] निघ. – 1.12.46

[179] निघ.- 1.12.47

[180] निघ. - 1.12.48

[181] या प्रापणे – अ.पर.धा.पा. – 1049

[182] भृ-मृ-शी-तृ-चरि-त्सरि-तनि-धनि-मि-मस्जिभ्य उः (उ.- 1.7) 7

[183] दे.य. – याति निम्नं प्रदेशं यादुः (निघ. - 1.12.48)

[184] भू सत्तायाम् - भ्वा.पर.धा.पा. - 1

[185] गी. – 7.6

[186] गी. – 7.7

[187] निघ. – 1.12.50

**51.** **भविष्यत्** - जलवाचकेषु एकपञ्चाशत्तमपदमस्ति भविष्यत् ।[191] धातुपाठे भ्वादिगणे पठितस्य भू[192]-धातोर्भविष्यदर्थे लृट-लकारेण,[193] स्य[194]-प्रत्ययेन, इडा[195] गमेन च पदमिदं निष्पन्नम् । अनागतकाले प्रलये च सर्वेषां पदार्थानां विनाशे सत्यपि जलमेवास्ति।[196] अतएव भविष्यदिति पदेन जलमुच्यते।

**52.** **महत्** - पर्य्यायेऽस्मिन् द्विपञ्चाशत्तमपदमेव महत् ।[197] धातुपाठे भ्वादिगणे चुरादिगणे च पूजार्थकात् मह-धातोः[198] पदमिदं निष्पादितम् । येन देवपूजा सम्पादिता, यदेव वा देवतारूपेण पूजितं तदेव महत्-पदवाच्यम् । दशपाद्युणादिवत्तावपि *महति महयति वा महत् – पूजितम्* ।[199] पूजासमये जलमेव श्रेष्ठतमोपकरणम् ।

**53.** **आपः**- आप[200]स्तावत् त्रिपञ्चाशत्तमः शब्दः उदकपर्य्यायेषु । धातुपाठे स्वादिगणीये व्याप्त्यर्थक-आप्[201]-धातुना सह क्विप्-प्रत्ययेन, जसि दीर्घेन[202] चापशब्दः निष्पन्नः । कृत्स्नं जगत् ताभिर्व्याप्त्यमि[203]ति आपः।

**54.** **व्योम** - जलपर्य्यायेषु चतुःपञ्चाशत्तमशब्दस्तावद् व्योम ।[204] भ्वादिगणीये वि-पूर्वकात् व्याप्त्यर्थक-अव[205]-धातोरौणादिक-मनिन्[206]-प्रत्ययेन, उठि गुणेन[207] व्योमशब्दः निष्पद्यते । जलस्य व्याप्तत्वम् अस्मासु प्रसिद्धम् ।

---

188 भू सत्तायाम् - भ्वा.पर.धा.पा. - 1

189 भु-सू-धू-भ्रस्जिभ्यश्छन्दसि (उ. – 2.81) 238

190 दे.य. - भवन्त्यनेन सर्वे पदार्था इति भुवनम् (निघ. – 1.12.50)

191 निघ. – 1.12.51

192 भू सत्तायाम् - भ्वा.पर.धा.पा. - 1

193 लृट् शेषे च (पा. – 3.3.13)

194 स्यतासी लृलुटोः (पा.- 3.1.33)

195 आर्धधातुकस्येड् वलादेः (पा. – 7.2.35)

196 दे.य.- जलं ह्यागामिन्यपि काले विद्यते, प्रलयेऽपि जलत्वस्य नाशाभावात् (निघ. 1.12. 51)

197 निघ. – 1.12.52

198 महः पूजायाम् – भ्वा / चु. पर.धा.पा. – 730 / 1868

199 द.उ.वृ. – 6.5

200 निघ. - 1.12.53

201 आप्लृ व्याप्तौ - स्वा.पर.धा.पा. - 1260

202 अप्तृन्-तृच्-स्वसृ-नप्तृ... (पा. - 6.4.11)

203 दे.य. - कृत्स्नं ताभिर्हि व्याप्तम् (निघ.- 1.12.53)

204 निघ. - 1.12.54

205 अव रक्षणगतिरान्तिप्रीतितृप्त्यवगम...– भ्वा.पर.धा.पा. -600

206 अवतेष्टिलोपश्च (उ. – 1.139) 139

207 ज्वरत्वरस्रिव्यविमवामुपधाश्च (पा. - 6.4.20)

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8320

I J A M S R

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**55. यशः-** जलवाचकः पञ्चपञ्चाशत्तमशब्दस्तावद्यशः ।[208] धातुपाठे स्वादिगणस्य व्याप्त्यर्थक-अशू[209]-धातोरौणादिकासुनि, युडागमेन[210] च यशस्पदं निष्पद्यते । शब्देनानेनोदकस्य व्याप्तिधर्मत्वं प्रकाशितम् । समग्रं जगद्व्याप्नोतीति[211] तस्योदकस्य यशस्त्वम् । गोपथब्राह्मणे तु वर्षा एव यशः ।[212]

**56. महः** – जलपर्यायेषु षट्पञ्चाशत्तमशब्द एव महः ।[213] मह्-धातोरौणादिक-असुन्-प्रत्यययोगेन[214] मह-शब्दो निष्पन्नो जातः । येन देवपूजा सम्पादिता, यदेव वा देवतारूपेण पूजितं तदेव महत्पदवाच्यम् । दशपाद्युणादिवृत्तौ अपि महति महयति वा महत् – पूजितम्[215] इत्युक्तम् । पूजाकाले जलमेव प्रधानं श्रेष्ठतमं चोपकरणमिति कृत्वा जलस्य महत्वमिति प्रतिपादितम् ।

**57. सर्णीकम्-** उदकपर्याये सर्णीकम[216]स्ति सप्तपञ्चाशत्तमः शब्दः । भ्वादिगणे गत्यर्थक-सृ[217]-धातोरौणादिक-ईकन्[218]-प्रत्ययेन नुमागमेन[219] च पदमिदं निष्पन्नम् । गच्छति धावतीति सर्णीकम् ।[220] जलस्य गमनं धावनं च अस्मासु प्रसिद्धम् ।

**58. स्वृतीकम्-** निघण्ट्वाम्नातेषूदकवाचकेषु अष्टपञ्चाशत्तमः शब्दस्तावत् स्वृतीकम् ।[221] गत्यर्थक-स्वृ[222]-धातारौणादिक-ईकन्[223]-प्रत्ययेन निपातनात्तुगागमेन च स्वृतीकशब्दः निष्पन्नः । निम्नप्रदेशं गच्छतीति स्वृतीकम् ।

**59. सतीनम्-** सतीनमेव[224] निघण्टूक्तेषूदकवाचकेषूनषष्टितमः शब्दः । विशरण-गति-अवसादनार्थकात् भ्वादिगण-तुदादिगणे पठितात् षद्[225]-धातोरौणादिक-ईकन्[226]-प्रत्ययेन, निपातनात् द-कारस्य त-कारादेशेन च सतीनं पदं निष्पन्न

---

[208] निघ. - 1.12.55
[209] अशू व्याप्तौ संघाते च (उ. - 4.110) 630
[210] अशेर्देवने युट् च (उ. - 4.110) 630
[211] दे.य. - अश्नुते व्याप्नोति जगत् (निघ.- 1.12.55)
[212] गो.ब्रा.- 1.5.15
[213] निघ. – 1.12.56
[214] सर्वधातुभ्योऽसुन् (उ. – 4.188) 628
[215] द.पा.वृ. – 6.5
[216] निघ. – 1.12.57
[217] सृ गतौ – भ्वा.पर.धा.पा. - 935
[218] अलीकादयश्च (उ. – 4.25) 465
[219] सर्त्तेर्नुम् च (उ. – 4.23) 463
[220] दे.य. – धावति सर्णीकम् (निघ. – 1.12.57)
[221] निघ. – 1.12.58
[222] सृ गतौ – भ्वा.पर.धा.पा. – 935
[223] अलीकादयश्च (उ. – 4.25) 465
[224] निघ. – 1.12.49
[225] षद्ळ विशरणगत्यवसादनेषु – भ्वा/तु.पर.धा.पा. – 854/1427
[226] अलीकादयश्च (उ. – 4.25) 465

I J A M S R
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

जातम् । सतीक वच्छतीनमित्यनेनापि जलस्य विशरण-गति-अवसादनार्थं सूचीतम् । मेघावघर्षणेनोदकस्य सृष्टिरत्र व्युत्पादिता ।

**60. गहनम्** – उदकवाचकेषु षष्टितमपदं तु गहनम् ।[227] धातुपाठे भ्वादिगणे विलोडनार्थकादवगाहनार्थकात् स्नानार्थकाद्वा गाह्[228]-धातोरौणादिक-युच्[229]-प्रत्ययेन, धातुगताकारस्य बाहुलकाद् ह्रस्वेन च गहनमिति पदं निष्पद्यते । प्राणिभिः स्नानकाले यदेवालोडितं तदेव गहनम् ।[230]

**61. गभीरम्-** उधकपर्यायेषु निघण्टूक्तेषु गभीरम्[231] एकषष्टितमः शब्दः । गमनार्थक-गम्-धातोरौणादिक-ईरन्[232]-प्रत्ययेन निपातनात् नुमागमेन मस्थाने भकारेण चोदकवाचकं गभीरं पदं निष्पन्नम् । यज्ञकर्मसु ऋत्विग्भिर्यजमानैश्चाहृतं जलं विशेषरूपेण गच्छतीति गभीरम् ।[233]

**62. गम्भरम्-** निघण्टुकथितेषु जलपर्य्यायेषु गम्भरम[234]स्ति द्विषष्टितमः शब्दः । गमनार्थक-गम्-धातोरौणादिक-अर[235]-प्रत्ययेन निपातनात् भटागमेन च गम्भरमिति पदं निष्पद्यते । गभीरगम्भरे समानार्थके ।

**63. ईम् -** निघण्टूक्तेषु जलवाचकेषु त्रिषष्टितमपदमस्ति ईम् ।[236] एतत्तु अव्ययवाचकमिति ।[237] पदस्यास्यावयवनिर्णये कोऽप्यर्थो नावगम्यतेऽस्माभिः । रूढिवशातदीमित्यस्य जलरूपार्थः समुपलभ्यते । रूढि नाम व्युत्पत्तिरहितशब्दविशेषः ।

**64. अन्नम्** - जलवाचकेषु अन्नम् एव चतुःषष्टितमः शब्दः ।[238] धातुपाठे अदादिगणे[239] प्राणार्थकात् अन्-धातुना सह औणादिके न-प्रत्यये[240] कृते सति अन्नमिति पदं निष्पन्नं जातम् । जलं विना प्राणिनः न जीवन्ति इत्येव सर्वैर्ज्ञायते । अत एव अन्यते प्राण्यते प्रजाभिः, न हि कदाचिदपि जलेन विना प्राणिनो जीवन्ति इति कृत्वा अन्नं पदेन जलमित्यवगम्यते ।[241]

---

227 निघ. – 1.12.60
228 गाहू विलोडने – भ्वा.आ.धा.पा. - 649
229 बहुलमन्यत्रापि (उ. – 2.79) 236
230 दे.य. – अवगाह्यते प्राणिभिः गहनम् (निघ. – 1.12.60)
231 निघ. – 1.12.61
232 गभीरगम्भीरौ (उ. 4.35) 475
233 दे.य. – गच्छति यज्ञेष्वाहृतं वसतीवर्य्यादिरूपेण (निघ. – 1.12.61)
234 निघ. – 1.12.62
235 कृदरादयश्च (उ. – 5.41) 719
236 निघ. – 1.12.63
237 दे.य. – 1.12.63 (निघ.)
238 निघ. – 1.12.64
239 अनँ प्राणने – अदा.प.धा.पा. - 1070
240 कृवृजॄसिद्रुपन्यभिस्वपिभ्यो नित् (उ. – 2.9) 290
241 दे.य. – 1.12.64 (निघ.)

**65. हविः** – जलवाचकेषु पञ्चषष्टितमशब्द एव हविः ।[242] धातुपाठे जुहोत्यादिगणे दानार्थकग्रहणार्थकाभ्यां हु[243]-धातोरौणादिक-इसि-प्रत्ययेन हविरिति पदं निष्पन्नम् । तृष्णार्तमुद्दिश्य तृष्णादूरीकर्तुं[244] यदेव प्रदत्तं तदेव जलम् ।[245] दानार्थकत्वाद् हविः-पदेन जलमुच्यते ।

**66. सद्म** - पर्य्यायेऽस्मिन् षट्षष्टितमः शब्द एव सद्म[246] । धातुपाठे भ्वादिगणे तुदादिगणे च पटितेन षद्[247]-धातुना सहौणादिक-मनिन्[248]प्रत्यययोगेन सद्म-शब्दः निष्पद्यते । षद्धातोः विशरण-गति-अवसादनार्थकरूपाः त्रिविधार्था सद्म-सदनाभ्यां शब्दाभ्यां प्रकाशिताः । अत्र निम्नप्रदेशं गच्छति गम्यते वा प्राणिभिरिति[249] सद्म ।

**67. सदनम्** - पर्य्यायेऽस्मिन् सप्तषष्टितमः शब्दः सदनम्[250] इति । धातुपाठे भ्वादिगणे तुदादिगणे च पटितेन षद्[251]-धातुना औणादिक-युच्[252]-प्रत्ययेन सदनमिति शब्दः निष्पद्यते । षद्धातोः विशरण-गति-अवसादनार्थकरूपाः त्रिविधार्था सद्म-सदनाभ्यां शब्दाभ्यां प्रकाशिताः । अत्र निम्नप्रदेशं गच्छति गम्यते वा प्राणिभिरिति[253] सदनमिति ।

**68. ऋतम्**- जलपर्य्यायेषु शब्देषु अष्टषष्टितमशब्द एव ऋतम् ।[254] गत्यर्थेन ऋ[255]-धातुना सह कर्त्तरि क्त-प्रत्ययेन निष्पन्नेन ऋतमिति शब्देन जलस्य निम्नगामित्वमुपलभ्यतेऽस्माभिः ।

**69. योनिः** - योनि[256] अस्त्युदकपर्य्यायेषूनसप्ततितमशब्दः । धातुपाठेऽदादिगणे मिश्रणार्थकात् यु-धातुना[257] सहौणादिक-निप्रत्ययेन[258] योनिरिति शब्दो निष्पद्यते । योनिरेवान्नस्य कारणम् ।[259] अन्नस्य कारणत्वाज्जलं योनिपदवाच्यम् ।

---

242 निघ. – 1.12.65

243 हु दानादनयोः – जु.पर.धा.पा. - 1083

244 दे.य. – आदीयते वा जनैरुपभोगाय (निघ. – 1.12.65)

245 दे.य. – दीयते पिपासितेभ्यः ... (निघ. – 1.12.65)

246 निघ. – 1.12.66

247 षद्ऌ विशरणगत्यवसादनेषु – भ्वा/तु.पर.धा.पा. – 854/1423

248 सर्वधातुभ्यो मनिन् (उ.- 4.144) 584

249 दे.य. – गच्छति वागच्छति निम्नं, गम्यते वा प्राणिभिः (निघ. – 1.12.66-67)

250 निघ.- 1.12.67

251 षद्ऌ विशरणगत्यवसादनेषु – भ्वा/तु.पर.धा.पा. – 854/1423

252 बहुलमन्यत्रापि (उ.- 2.79) 236

253 दे.य. – गच्छति वागच्छति निम्नं, गम्यते वा प्राणिभिः (निघ. – 1.12.66-67)

254 निघ.- 1.12.68

255 ऋ गतिप्रापणयोः - भ्वा.पर.धा.पा. - 936

256 निघ. – 1.12.69

257 यु मिश्रणेऽमिश्रणे च – अ.पर.धा.पा. - 1033

258 वहि-श्रि-श्रु-...नित् (उ. – 4.51) 491

259 दे.य. – योनिः कारणमन्नस्य (निघ. – 1.12.69)

**70. ऋतस्य योनिः** – जलपर्य्यायेषु सप्ततितमपदमस्ति ऋतस्य योनिः ।[260] अत्रालुक्तत्पुरूषसमासः । ऋतस्य यज्ञस्यापरिहार्यत्वाज्जलस्य ऋतयोनित्वम् । जलं विना किमपि श्रौतकर्म न साधयतीति[261] कृत्वा जलस्य ऋतयोनित्वं प्रतिपादितम् ।

**उपसंहारः -**

मानवाः खलु परिवेशजाः, परिवेशवर्धिताः परिवेशसहिताश्च । मातृजठरादनु परिवेश एव तेषां मानवानां धात्रीकल्पोरूपेण विराजते । परिवेशः खलु तान् मानवान् लालयति पालयति परिवर्धयति च ।

परिवेशो नाम मानवानां पारिपार्श्विकं नित्यनैमित्तिकं जीवनम् । अस्माकं वृक्षाः लतागुल्मादय अटव्यरण्यविपिनं, नद्यः, समुद्रश्च, अचलायतनाः पर्वताः इतरे चास्माकं आत्मीयाः ये खलु नितरामनुदिनामस्माकं संवेष्ट्य विराजन्ते, वर्धयन्ति टास्माकं बुद्धिवृत्तिं, परिपोषयन्ति चास्माकं मनोवृत्तिं, संरक्षयन्ति अस्माकं श्रवणशक्तिं, दृष्टिशक्तिं, घ्राणशक्तिं, स्पर्शशक्तिञ्च । सोऽयं जननीकल्पः परिवेशः अस्माभिर्भागद्वयेन विभक्तुं शक्यते – प्राकृतिकपरिवेशः, सामाजिकपरिवेशशेति । यत्र खलु प्राकृतिके परिवेशे निदानोपादानतया निसर्ग एव मौर्धण्यं भजते, पक्षान्तरे तत्रैव सामाजिकः परिवेशः सामाजिकेनैव मानवेन नियन्तृरूपेण नियम्यते ।

प्राकृतिकपरिवेशस्य, अस्माकं, प्रधानोपादानमेव जलम् । जलं नाम अस्माकं जीवनम् । आ च सृष्टेः जलमेवास्ति । परन्तु कस्मात्तस्य जलस्योत्पत्तिरिति चेदुपनिषत्सु आम्नायते - ***सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः …*** ।[262] इति । आशयो यत्, परमब्रह्मणः प्रथमतया आकाशो जायते । तस्मादेव आकाशाद्वायुरजायत । वायो अग्नि अजायत । अग्ने एव जलस्योत्पत्ति इति ।

नदीमातृको देशोऽस्माकमिदं भारतवर्षम् इति सर्वैरेव ज्ञायते । अपि तु जलमेवास्माकं जीवनम् । तदर्थं निघण्टुसमुल्लिखितानां जलवाचकशब्दानां रूपतत्त्वगतार्थसमीक्षणमेवास्य गवेषणापत्रस्यास्य मुख्योद्देशःोऽस्ति इति ॥

**शब्दसंक्षेपसूची -**

अ.आ.धा.पा. - अदादिगणीय-आत्मनेपदी-धातुपाठः

अ.उ.धा.पा. – अदादिगणीय-उभयपदी-धातुपाठः

अ./अदा.पर.धा.पा. – अदादिदणीय-परस्मैपदी-धातुपाठः

अम. – अमरकोशः

उ. – उणादिसूत्रम्

ऋ. – ऋग्वेदः

क्र्या.उ.धा.पा. – क्रादिगणीय-उभयपदी-धातुपाठः

क्र्या.पर.धा.पा. – क्र्यादिगणीय-परस्मैपदी-धातुपाठः

गी. – श्रीमद्भगवद्गीता

[260] निघ. – 1.12.70

[261] दे.य. - … नह्युदकेन विना कश्चिदपि यज्ञः कर्तुं शक्यते (निघ. – 1.12.70)

[262] तै.उ. – 2.1

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

चु.पर.धा.पा. – चुरादिगणीय-परस्मैपदी-धातुपाठः चु.उ.धा.पा. – चुरादिगणीय-उभयपदी-धातुपाठः
जु.पर.धा.पा. – जुहोत्यादिगणीय-परस्मैपदी-धातुपाठः जु.उ.धा.पा. – जुहोत्यादिगणीय-उभयपदी-धातुपाठः
त./तन.पर.धा.पा. – तनादिगणीय-परस्मैपदी-धातुपाठः तन.उ.धा.पा. – तनादिगणीय-उभयपदी-धातुपाठः
तु.पर.धा.पा. – तुदादिगणीय-परस्मैपदी-धातुपाठः द.उ.वृ. – दशपादी-उणादि-वृत्तिः
दि.आ.धा.पा. – दिवादिगणीय-आत्मनेपदी-धातुपाठः दि.पर.धा.पा. – दिवादिगणीय-परस्मैपदी-धातुपाठः
दे.य. – देवयज्वा नाट्य. – नाट्यशास्त्रम् नि. – निरुक्तम् निघ. – निघण्टुः
पा. – पाणिनिः पा.शि. – पाणिनीयशिक्षा भ्वा.आ.धा.पा. – भ्वादिगणीय-आत्मनेपदी-धातुपाठः
भ्वा.उ.धा.पा. – भ्वादिगणीय-उभयपदी-धातुपाठः भ्वा.पर.धा.पा. – भ्वादिगणीय-परस्मैपदी-धातुपाठः
मनु. – मनुस्मृतिः रु.उ.धा.पा. – रुधादिगणीय-परस्मैपदी-धातुपाठः सा.भा. – सायणभाष्यम्
स्वा.आ.धा.पा. – स्वादिगणीय-आत्मनेपदी-धातुपाठः स्वा.पर.धा.पा. – स्वादिगणीय-परस्मैपदी-धातुपाठः

**ग्रन्थपञ्जी** –

*अमरकोषः अमरार्थचन्द्रिका* वा । सम्पा. – गुरुनाथ-भट्टाचार्यः । कोलकाता : संस्कृत-पुस्तक-भाण्डारः, 1417 वङ्गाब्दः ।

*अष्टाध्यायी* । चन्द्रलेखा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता । मदर्षि-पाणिनिः । व्याख्याकारः- ईश्वरचन्द्रः । प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला 103, दिल्ली : चोखम्बा संस्कृत प्रतिष्ठान, 2004.

*अष्टाध्यायी* । सम्पा. – तपनशङ्कर-भट्टाचार्यः । कोलकाता : संस्कृत-वुक-डिपो, 2004.

*धातुप्रदीपः* श्रीशचन्द्रचक्रवर्तिकृत-धातुप्रदीपविवरणसहितः । मैत्रेयरक्षितरचितः । सम्पा. – करुणासिन्धुदासः । कोलकाता: संस्कृत पुस्तक भाण्डार, 2003.

*निरुक्तम्*, यास्कप्रणीतम् । सम्पा. – अमरेश्वरठाकुरः । कोलकाता : कोलकाता विश्वविद्यालयः, पुनर्मुद्रितसंस्करणम्, 2003.

*निरुक्तम्*, यास्कप्रणीतम् (प्रथम-द्वितीयाध्यायः) । सम्पा. – उमाशङ्करशास्त्री । विद्याभवन संस्कृतग्रन्थमाला 57 । वाराणसी: चौखम्बा विद्याभवन, 2017.

*निरुक्तम्* (निघण्टु) । आचार्य-यास्कः । सम्पा. – मनसुखराय मोर । श्रीदेवराजयज्वकृतटीकासनाथीकृतं प्रथमो भागः, कोलकाता, 1952.

*निरुक्तम्* (निघण्टु) आचार्य-यास्कप्रणीतम्, (श्रीदेवराजयज्वकृत *निर्वचन* नाम टीका सहितम्) । सम्पा. – देवराजयज्वः । प्रथमो भागः । गुरुमण्डलग्रन्थमाला – 10. कोलकाता : क्लाइव रो, 1952.

*वैदिक-निघण्टु-सङ्ग्रहः* । सम्पा. – धर्मवीरो विद्यावारिधिः । प्राच्यविद्यानुसन्धानग्रन्थामाला प्रथमं प्रसूनम्, बहालगढ, 1989.

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

*वैयाकरणसिद्धान्तकौमुदी*, भट्टोजीदीक्षितविरचिता । सम्पा.- रामचन्द्र झा । व्याख्याकारः- सत्यनारायण शास्त्री खण्डुडी । इन्दु*मती*-संस्कृत-हिन्दीव्याख्या-विविधपरिशिष्ट टिप्पणी (नोटस्) सहिता (ण्यन्तादि-समाप्त्यन्तो भागः), पुनर्मुद्रणम्, कृष्णदास संस्कृत सीरीज् 13, वाराणसीः कृष्णदासअकादमी, 2002.

*वैदिक-पदानुक्रम-कोषः* । सम्पा.- विश्वबन्धु । संहिताभागः, शान्तकुटीवैदिकग्रन्थमाला, होशियारपुरः विश्वेश्वरानन्द-वैदिक-शोध-संस्थान, प्र.भागः (अ)- द्वि.स., 1976; द्वि.भागः (अ-घ)-द्वि.स., 1985; तृ.भागः (च-न)-1956; च.भागः (प-स)-1959; प.भागः (व-स)- 1962.

*Indian Etymologists and Their Etymologies*. Dipak Bhattacharya. Kolkata: School of Vedic Studies, Rabindra Bharati University, 2002.

*The Vedic Etymology, A Critical evaluation of the Science of Etymology as found in Vedic literature.* Fatah Singh. The Chaukhamba Surbharti Studies 6, rpt. Varanasi: Chaukhamba Surbharti Prakashan, 2008.

……………………………………………